"ततो न्हदुस्तस्मात् तिग्मस्तिग्मात् बृहद्रथः ॥"
मत्स्यपुराणमते तु अयं उर्व्वस्य सुतः । यथा, तत्रैव । ५० । ८४ ।
"उर्व्वो भाव्यो सुतस्तस्य तिग्मात्मा तस्य चात्मजः ।
तिग्मात् बृहद्रथो भाव्यो वसुदामा बृहद्रथात् ॥"
अयं तिमिरित्याख्ययापि प्रसिद्धः । इति राजावली ॥ अस्य राज्यपालनकालादिकं तिमिशब्दे द्रष्टव्यम् ॥)

तिग्मांशुः, पुं, (तिग्मास्तीक्ष्णा अंशवः किरणानि यस्य ।) सूर्य्यः । इति हलायुधः ॥ (यथा, महाभारते । १ । २ । ११६ ।
"धौम्योपदेशात् तिग्मांशुप्रसादादन्नसम्भवः ॥"
अग्निः । यथा, महाभारते । १ । २३३ । १८ ।
"इदं वै सद्म तिग्मांशो वरुणस्य परायणम् ॥"
तीक्ष्णकिरणे, त्रि ॥)

तिघ, न घातने । इति कविकल्पद्रुमः ॥ (स्वां-परं-सकं-सेट ।) न, तिघ्नोति । तिघ घाते इति जौमराः पठन्ति । तेन तदर्थकल्पनमेवोचितम् । ततश्च घातनमिति हन्त्यर्थस्य णाचिकचुरादित्वेन हन्तेः स्वार्थे णौ रूपम् । हननमित्यर्थः । किञ्च । हिंसनपाठेनैवेष्टसिद्धे घातनपाठो हिंसाप्रेरणार्थः स्यान्न वेति काकदन्तान्वेषणवद्विफलं चयाणामेव कातन्त्राद्यसम्मतत्वात् । इति दुर्गादासः ॥

तिज, क शिते । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क, तेजयति । शितं तीक्ष्णीकरणम् । इति दुर्गादासः ॥

तिज, ङ क्षान्तौ । निशाने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) क्षान्तिः सहनम् । ङ, तितिक्षते दुःखं दीनः । तेजते । तत्र तिजादयो न प्रयुज्यन्ते । इति रमानाथः । इति दुर्गादासः ॥

तिजिलः, पुं, (तेजयति तीक्ष्णीकरोति । यद्वा, तिज्यते सह्यते सर्व्वैरिति । तिज+"गुपादिभ्यः कित् ।" उणां । १ । ५७ । इति इलच् स च कित् ।) चन्द्रः । इत्युणादिकोषः ॥ राक्षसः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

तिट्टी, स्त्री, भित्तृ । इति शब्दचन्द्रिका ॥ (भित्तृशब्दे गुणादिरस्या ज्ञातव्यः ॥)

तितउः, पुं, (तन्यन्ते भ्रष्टयवा अनेनेति । तन विस्तारे+"तनोतेर्डउः सन्वच्च ।" उणां । ५ । ५२ । इति डउः सन्वच्च तेन अभ्यासस्येत्त्वादिकार्य्यम् ।) चालनी । इत्यमरः । २ । ६ । २६ ॥ हेमचन्द्रश्च । ४ । ८४ ॥ (यथा, ऋग्वेदे । १० । ७१ । २ ।
"सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ॥"
यथाच,—
"शूर्पवद्दोषसन्त्यज्य गुणं गृह्णन्ति साधवः ।
दोषग्राही गुणत्यागी असाधुस्तितउर्यथा ॥"
इत्युद्भटः ॥
"क्षुद्रच्छिद्रशतोपेतं चालनं तितउ स्मृतम् ॥"
इत्युक्तेरस्य क्लीवत्वमपि ॥ क्लीवम् । इति उज्ज्वलदत्तः । ५ । ५२ ॥)

तितिक्षा, स्त्री, (तिज+स्वार्थे सन्+"अ प्रत्ययात् ।" ३ । ३ । १०२ । इति अ ततष्टाप् ।) क्षान्तिः । इत्यमरः । १ । ७ । २४ ॥ (परापराधसहनम् । यथा, भागवते । ११ । १६ । २६ ।
"शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतम् ॥")
शीतोष्णादिद्वन्द्वसहिष्णुता । इति वेदान्तसारः ॥ (यथा, भागवते । ४ । २२ । २४ ।
"यमैरकामैर्नियमैश्चाप्यनिन्दया
निरीहया द्वन्द्वतितिक्षया च ॥")

तितिक्षितः, त्रि, (तितिक्षा सञ्जातास्य । "तदस्य सञ्जातं तारकादिभ्य इतच् ।" ५ । २ । ३६ । इति इतच् ।) क्षान्तः । इति जटाधरः ॥

तितिक्षुः, त्रि, (तितिक्षते इति । तिज क्षमायाम्+"गुप्तिज्किद्भ्यः सन् ।" ३ । १ । ५ । इति सन् । ततः तितिक्ष+"सनाशंसभिक्ष उः ।" ३ । २ । १६८ । इत्युः ।) क्षमाशीलः । क्षान्तः । इत्यमरः । ३ । १ । ३१ ॥ (यथा, महाभारते । १ । ८७ । ६ ।
"अक्रोधनः क्रोधनेभ्यो विशिष्ट-
स्तथा तितिक्षुरतितिक्षोर्विशिष्टः ॥"
पुरुवंशीयस्य महामनसः पुत्त्रविशेषः । यथा, हरिवंशे । ३१ । २१ ।
"महामनास्तु पुत्त्रौ द्वौ जनयामास भारत ! ।
उशीनरञ्च धर्म्मज्ञं तितिक्षुञ्च महाबलम् ॥")

तितिभः, पुं, (तितीति शब्देन भणतीति । भण+डः ।) इन्द्रगोपकीटः । इति हेमचन्द्रः । ४ । २७५ ॥

तितिलं, क्ली, (तिलति स्निह्यतीति । तिल+बाहुलकात् कः द्वित्वञ्च ।) नन्दकम् । नादा इति भाषा । तैतिलकरणम् । तिलपिष्टम् । इत्यजयः ॥

तित्तिरः, पुं, (तित्ति इति शब्दं राति ददातीति । रा+"आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) तित्तिरिपक्षी । इति शब्दरत्नावली ॥ (यथा, महाभारते । ५ । ६ । ३८ ।
"निलस्तेषु ततस्तेषु निष्क्रामन्ति शिरःसु च ।
कपिञ्जलास्तित्तिराश्च कलविङ्काश्च सहस्रशः ॥"
अस्य गुणाः । यथा,—
"तथैव तित्तिरो हृद्यो मेधाग्निबलवर्द्धनः ।
सर्व्वदोषहरो बल्यो लावकैः समतागुणैः ॥
कृष्णगौरावभेदाश्च श्रेष्ठो गौरश्च तित्तिरः ।
तृतीयस्तित्तिरोऽन्योऽपि सामान्यगुणलक्षणैः ।
सवातलोऽतिबलकृद्घनः किञ्चिद्रसायनः ॥"
इति हारीते प्रथमे स्थाने ११ अध्याये ॥
जनपदविशेषः । तद्देशजाते बहुवचनान्तः । यथा, महाभारते । ६ । ४७ । ५० ।
"वाह्लीकास्तित्तिराश्चैव चोलाः पाण्ड्याश्च भारत ॥)

तित्तिरिः, पुं, (तरतीति । तॄ+"तरतेः सन्वत्लुक् चाभ्यासस्य ।" उणां । ४ । १४२ । इत्यत्र उज्ज्वलदत्तधृतसूत्रात् इः सन्वत्कार्य्यमभ्यासस्य । लुगागमश्च ।) पक्षिविशेषः । तितिरि इति भाषा । तत्पर्य्यायः । तित्तिरः २ । इति शब्दरत्नावली ॥ तितिरिः ३ तैतिरः ४ याजुषोदरः ५ । अस्य मांसस्य गुणाः । रुच्यत्वम् । लघुत्वम् । वीर्य्यबलप्रदत्वम् । कषायत्वम् । मधुरत्वम् । शीतत्वम् । त्रिदोषशमनत्वञ्च । इति राजनिर्घण्टः ॥
"तित्तिरिः कृष्णवर्णः स्यात् स तु गौरः कपिञ्जलः ।
तित्तिरिर्व्वर्णदो ग्राही हिक्कादोषत्रयापहः ।
श्वासकासज्वरहरस्तस्माद्गौरोऽधिको गुणः ॥"
इति भावप्रकाशः ॥
मुनिविशेषः । इति विश्वः ॥ (यथा, महाभारते । २ । ४ । १२ ।
"तित्तिरिर्याज्ञवल्क्यश्च ससुतो लोमहर्षणः ॥")
तैत्तिरीशाखा । इत्युणादिकोषः ॥ (नागविशेषः । यथा, महाभारते । १ । ३५ । १५ ।
"कुमुदः कुमुदाक्षश्च तित्तिरिर्हलिकस्तथा ॥"
तथा च स्कान्दे सह्याद्रिखण्डे । ४ । ५ ।
"तित्तिरिर्हरिभद्रश्च जम्बुरुद्रो बलाहकः ॥")

तिथः, पुं, (तेजयतीति । तिज+"तिथपृष्ठगूथयूथप्रोथाः ।" उणां । २ । १२ । इति थक्प्रत्ययेन निपातनात् साधुः ।) अग्निः । कामः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ कालः । इति त्रिकाण्डशेषः ॥ प्रावृट्कालः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

तिथिः, स्त्री पुं, (तनोति विस्तारयति चन्द्रकलामिति । तन्यते चन्द्रकलयेति वा । तन+बाहुलकात् इथिन् नादिलोपश्च । तदुक्तं "तन्यन्ते कलया यस्मात् तस्मात् तास्तिथयः स्मृताः ।" इति । यद्वा, अततीति । अत सातत्यगमने+"ऋतन्यञ्जीति ।" उणां । ४ । २ । इथिन् प्रत्ययेन अतिथिरिति सिद्धे बाहुलकात् अलोपः । इति वर्णविवेकः ।) चन्द्रकलाक्रियारूपा । चन्द्रकलाक्रियोपलक्षितः काल इति वा । तस्याः स्वरूपं यथा,—
"अमादिपौर्णमास्यन्ता या एव शशिनः कलाः ।
तिथयस्ताः समाख्याताः षोडशैव वरानने ! ॥
तत्र प्रथमकलाक्रियारूपा प्रतिपत् एवं द्वितीयादिकलाक्रियारूपा द्वितीयादिः । सा च वृद्धिरूपा चेत् शुक्ला ह्रासरूपा चेत् कृष्णा ॥ यथा,
"तत्र पक्षावुभौ मासे शुक्लकृष्णक्रमेण हि ।
चन्द्रवृद्धिकरः शुक्लः कृष्णश्चन्द्रक्षयात्मकः ॥
पक्षत्याद्यास्तु तिथयः क्रमात् पञ्चदश स्मृताः ।
दर्शान्ताः कृष्णपक्षे ताः पूर्णिमान्ताश्च शुक्लके ॥
गोभिलोक्तामावास्याघटकोपर्य्यधोभावापन्नसमसूत्रपातन्यायेन राश्येकावच्छेदेन सहावस्थानयुक्तार्कमण्डलाच्चन्द्रमण्डलस्य राशिद्वादशांशद्वादशांशभोगात्मकनिर्गमरूपवियोगेन शुक्लायाः प्रतिपदादितत्तत्तिथेरुत्पत्तिः । एवं गोभिलोक्तपौर्णमासीघटकपरमराश्यवस्थानरूपपरमवियोगानन्तरमर्कमण्डलप्रवेशाय चन्द्रमण्डलस्य राशिद्वादशांशद्वादशांशभोगात्मकप्रवेशरूपसन्निकर्षेण कृष्णायास्तत्तत्तिथेश्चोत्पत्तिरिति ।